# Gokarneshvara Manasika Aradhanam

# गोकर्णेश्वरमानसिकाराधनम्

## Document Information

Text title : Gokarneshvara Manasika Aradhanam

File name : gokarNeshvaramAnasikArAdhanam.itx

Category : shiva, pUjA

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 29 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

tirugokarNaM temple in Pudukottai District,TN

Latest update : March 30, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 30, 2023

*sanskritdocuments.org*

# गोकर्णेश्वरमानसिकाराधनम्

श्रीबृहदम्बाधिपते ब्रह्मपुरोगाः सुराः स्तुवन्ति त्वाम् ।
व्युष्टा रजनी शयनादुत्थायैषामनुग्रहः क्रियताम् ॥ १॥

गोकर्णनाथ गौर्या सहसुतयारुह्य पादुके हैमे ।
मौक्तिकमण्टपमेहि स्नातुमवष्टभ्य मामकं हस्तम् ॥ २॥

तैलैः सप्तमहार्णवीपरिमितैस्तावद्भिरुष्णोदकै -
राज्यक्षीरदधीक्षुचूतरससत्क्षौद्रैस्तथान्यैरपि ।
स्नानार्हैरभिषेचयामि चतुरो वेदान् पठन् भक्तितः
स्वामिन् श्रीबृहदम्बिकेश कृपया तत् सर्वमङ्गीकुरु ॥ ३॥

अण्डभित्तिपरिवेष्टनयोग्यान् हंसचित्रितदशानुपवीतैः ।
अर्पयामि भवते बृहदम्बाधीश धत्स्व नवपीतपटांस्त्वम् ॥ ४॥

भस्मोद्धूलनपूर्वकं शिव भवद्देहं त्रिपुण्ड्रैरलं-
कृत्यादावनु चन्दनैर्मलयजैः कर्पूरसंवासितैः ।
सर्वाङ्गं तव भूषयामि तिलकेनालीकमप्यादरात्
पश्यात्मानमनेकमन्मथसमच्छायं स्वमादर्शगम् ॥ ५॥

यावन्तस्त्रिजगत्सु रत्ननिकरा यावद्धिरण्यं च तै-
स्तेनापीश तवाङ्गकेषु रचयाम्यापादकेशं हृदा ।
योग्यं भूषणजातमद्य बृहदम्बेश त्वयाथाम्बिका-
पुत्रेण प्रतिगृह्यतां मयि कृपादृष्टिश्च विस्तार्यताम् ॥ ६॥

नन्दनचैत्ररथादिषु देवोद्यानेषु यानि पुष्पाणि ।
तैर्भूषयामि नागाभरण बृहन्नायिकेश ते गात्रम् ॥ ७॥

कोटिकोटिगुणितैः शिव बिल्वैः कोमलैर्वकुलवृक्षवनेश ।
स्वर्णपुष्पसहितैः श्रुतिभिस्त्वां पूजयामि पदयोः प्रतिमन्त्रम् ॥ ८॥

गुग्गुळुभारसहस्रैर्बाडववह्नौ प्रधूपितो धूपः ।

चकुलवनेश स्वामिन्नगरुसमेतस्तवास्तु मोदाय ॥ ९॥

बिसतन्तुवर्तिविहिताः सगोघृताः शतकोटिकोटिगणनोपरि स्थिताः
प्रभयाधरीकृतरवीन्दुपावका वकुलाटवीश तव सन्तु दीपिकाः ॥ १०॥

शाल्यन्नं कनकाभसूपसहितं सद्योघृतैरन्वितं
सोष्णं हाटकभाजनस्थमचलस्पर्धालु सव्यञ्जनम् ।
गोकर्णेश्वर गृह्यतां करुणया सच्छर्करान्नं तथा
मुद्गान्नं कृसरान्नमप्यतिसुधं पानीयमप्यन्तरा ॥ ११॥

कृसरमनोहरलड्डुकमोदकशष्कुल्यपूपवटकादीन् ।
सप्तसमुद्रमितान् श्रीवकुलवनाधीश भुङ्क्ष्व भक्ष्यांस्त्वम् ॥ १२॥

क्षोणीसंस्थैः समस्तैः पनसफलबृहन्नालिकेराम्ररम्भा-
द्राक्षाखर्जूरजम्बूबदरफललसन्मातुलङ्गैः कपित्थैः ।
नारङ्गैरिक्षुखण्डैरपि निजजठरं पूर्यतां मामकं चा-
भीष्टं गोकर्णसंज्ञस्थलनिलय महादेव सर्वज्ञ शम्भो ॥ १३॥

क्षीराम्भोधिगतं पयस्तदुचिते पात्रे समर्योपरि
प्रक्षिप्यार्जुनशर्कराश्वणकगोधूमान् सहैलानपि ।
पक्वं पायससंज्ञमद्भुततमं मध्वाज्यसम्मिश्रितं
भक्त्याहं वितरामि तेन बृहदम्बेशातिसन्तुष्यताम् ॥ १४॥

मल्लीपुष्पसमानकान्तिमृदुलानन्नाचलानम्बुधौ
दघ्नस्तद्वदमर्त्यधेनुदधिजान् हैयङ्गवीनाचलान् ।
क्षिप्त्वा श्रीबृहदम्बिकेश लवणैः किञ्चित् समेतं मया
दास्यामः(?)पिचुमन्दचूर्णसहितं दध्योदनं भुज्यताम् ॥ १५॥

अर्घ्यां चाचमनीयं पानीयं क्षालनीयमप्यम्बु ।
स्वामिन् वकुलवनेश स्वःसरिदद्भिः सुधाभिरपि दद्याम् ॥ १६॥

हर्म्ये रत्नपरिष्कृते मरतकस्तम्भायुतालङ्कृते
दीप्यद्धेमघटैरलङ्कृतशिरस्यालम्बिमुक्तासरे ।
दिव्यैरास्तरणैर्विभूषितमहामञ्चेऽभितो वासिते
साकं श्रीबृहदम्बया सकुतुकं संविश्य विश्रम्यताम् ॥ १७॥

पञ्चाक्षरेण मनुना पञ्चमहापापभञ्जनप्रभुणा ।
पञ्चपराध्यैर्बिल्वैर्दक्षिणगोकर्णनायकार्चामि ॥ १८॥

एलाक्रमुककर्पूरजातिकाजातिपत्रिभिः ।
ताम्बूलं चूर्णसंयुक्तं गोकर्णेश्वर गृह्यताम् ॥ १९॥

बृहदम्बापते हेमपात्रयित्वा महीतलम् ।
कर्पूरयित्वा हेमाद्रिं तव नीराजयाम्यहम् ॥ २०॥

छत्रं ते शशिमण्डलेन रचयाम्याकाशगङ्गाझरैः
श्वेतं चामरमष्टदिक्करिघटाकर्णानिलैर्बीजनम् ।
आदर्शं रविमण्डलेन जलदारावेण भेरीरवं
गन्धर्वाप्सरसां गणैर्वकुलभूवासेश तौर्यत्रिकम् ॥ २१॥

कल्याणाचलवर्चसो रथवरान् कार्तस्वरालङ्कृतान्
कैलासाद्रिनिभानिभानतिमरुद्वेगांस्तुरङ्गानपि ।
कामाभीप्सितरूपपौरुषजुषः सङ्ख्याविहीनान् भटा-
नालोक्याम्बिकयोररीकुरु बृहन्मातुः प्रियेशादरात् ॥ २२॥

काश्मीरचोलदेशानपि निजविभवैर्विनिन्दतः शश्वत् ।
सन्ततफलदान् देशान् श्रीबृहदम्बेश चित्तजान् प्रददे ॥ २३॥

स्वर्गं भर्त्सयतो निमीलितदृशः सत्यं ह्रियालोकितुं
वैकुण्ठं हसतः कचाकचिजुषः कैलासधाम्ना तव ।
अत्याश्चर्ययुतान् गृहानभिमतानुत्पाद्य बुद्ध्या स्वया
भक्त्याहं वितरामि देव वकुलारण्याश्रयाङ्गीकुरु ॥ २४॥

विश्वस्यान्तर्बहिरपि विभो वर्तसे तेन ते स्तः
तत् त्वां नन्तुं क्रमितुमभितोऽसम्भवान्नास्मि शक्तः ।
भक्താधीनस्त्वमसि बकुलाटव्यधीशोपचारान्
सर्वान् कुर्वे प्रणमनमुखानाशयेनानिशं ते ॥ २५॥

श्रीमन्मङ्गलतीर्थपश्चिमतटप्रासादभद्रासना-
जस्रावासकृतान्तरङ्गमहनीयाङ्गेन्दुगङ्गाधर ।
स्तोत्रं ते कलयामि शश्वदखिलाम्नायैः सहाङ्गैः पुनः
सर्वैश्चोपनिषत्पुराणकवितागुम्भैर्भवच्छंसिभिः ॥ २६॥

सकलत्रपुत्रपौत्रं सहपरिवारं सहोपकरणं च ।
आत्मानमर्पयामि श्रीबृहदम्बेश पाहि मां कृपया ॥ २७॥

कायकृतं वचनकृतं हृदयकृतं चापि मामकं मन्तुम् ।

परिहृत्य मामजस्त्रं त्वयि कृतभारं महेश परिपाहि ॥ २८॥

नक्षत्रमालिकैषा.. (Manuscript abruptly ends here)

इति गोकर्णेश्वरमानसिकाराधनं अथवा गोकर्णमानसिकपूजा सम्पूर्णम् ।

This is related to tirugokarNaM temple in Pudukottai District, TN

Proofread by Sivakumar Thyagarajan Iyer

*Gokarneshvara Manasika Aradhanam*

pdf was typeset on March 30, 2023

Please send corrections to *sanskrit@cheerful.com*